# <u>आदौ मुख्यवार्ताः</u>

- नवदिल्ल्यां भारत-अरब-विदेश-मन्त्रिणां द्वितीयम् उपवेशनं प्रचलति।
- भारत-यूरोप-मुक्तव्यापार-सन्धिना यूरोपीयसङ्घं प्रति भारतस्य निर्यातः पञ्चवर्षेषु द्विगुणितुं भवितुं शक्यते इति प्रोक्तवान् विदेशमन्त्रीपीयूषगोयलः।
- देशे पञ्चविंशति-कोट्यधिकानि मृदा-स्वास्थ्य-पत्राणि कृषकेभ्यः प्रदत्तानि। मृत्तिकायां पोषकतत्वानां क्षय-निवारणार्थं पञ्च-दशोत्तर-द्विसहस्रतमाब्दे एषा योजना आरब्धा आसीत्।
- उनचत्वारिंशत्तमः सूरजकुण्ड-अन्तर्राष्ट्रीय-शिल्पमहोत्सवः "**<u>स्थानीय से वैश्विक-आत्मनिर्भर भारत</u>**" इति विषयेन सह अद्य समारब्धः।
- पुरुषाणां क्रिकेट-क्रीडायाम् अद्य सायं तिरुवनंतपुरम् इत्यत्र पञ्चम्याम् अन्तिमायां च टी-विंशति-अन्ताराष्ट्रिय-क्रीडायां भारतीय-क्रिकेट-दलं न्यूज़ीलैण्ड-दलेन सह क्रीडिष्यति।

# <u>अथ वार्ताः विस्तरेण</u>

**<u>जयशङ्करः-भारत</u> (HL-1)**

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य उक्तवान् यत् आतङ्कवादं विरुध्य शून्य-सहिष्णुता इति अपरिवर्तनीयः सर्वस्वीकार्यः मानदण्डः भवेत्। नवदिल्ल्यां प्रवर्तमाने द्वितीय-भारत-अरब-विदेश-मन्त्रिणाम् उपवेशने स्वकीये प्रारम्भिक-भाषणे

डा. जयशङ्करः अवदत् यत् आतङ्कवादस्य सर्वरूपाणि, अभिव्यक्तिः च भारत-अरब-राष्ट्रयोः कृते सामान्या विभीषिका अस्ति । पारेसीमम् आतङ्कवादः विशिष्टरूपेण अस्वीकार्यः अस्ति यतः एषः अन्ताराष्ट्रिय-सम्बन्धानां कूटनीतेः च मूलसिद्धान्तानाम् उल्लङ्घनं करोति इति सः अकथयत् । सः इत्यपि अवदत् यत् आतङ्कवादेन पीडितस्य समाजस्य स्वकीयाः आत्मरक्षायाः मौलिकाधिकारः अस्ति, तथा च प्रबुद्धसमाजः अवश्यमेव तस्य अधिकारस्य प्रयोगं करिष्यति । सः अस्य वैश्विकप्रकोपस्य निवारणार्थम्, अन्ताराष्ट्रिय-सहयोगस्य सुदृढीकरणस्य आवश्यकतायाः च विषये अवधानं दत्तवान् । डा. जयशङ्करः अवदत् यत्, ते एकस्मिन् महत्त्वपूर्ण-समये तदा एकत्रीभवन्ति यदा विविध-कारणैः वैश्विक-व्यवस्थायां परिवर्तनं प्रचलति, तथा च राजनीतिः, अर्थशास्त्रं, प्रौद्योगिकी, जनसाङ्ख्यिकी च सर्वाः पूर्णतया सक्रियाः सन्ति । जयशङ्करः अवदत् यत् सूडान्, यमन्, लेबनान्, लिबिया इत्येतेषां देशानां स्थितिः अपि सामूहिक-रूपेण ध्यानं दातुं योग्या अस्ति । सः अवदत् यत् सिरिया-देशस्य घटनायाः दिशा अपि क्षेत्रस्य कल्याणाय महत्त्वपूर्णा अस्ति ।

## **गोयल-भारत-यूरोपव्यापारः (HL 2)**

भारत-यूरोप-मुक्तव्यापार-सन्धिना यूरोपीयसङ्घं प्रति भारतस्य निर्यातः पञ्चवर्षेषु द्विगुणितं भवितुं शक्नोति इति विदेशमन्त्रीपीयूषगोयलः प्रोक्तवान् । श्री गोयल्-

वर्यः व्यापारिणः, एम्. एस्. एम्. ई.-संस्थाः, स्टार्ट्-अप्-संस्थाः, उद्यमिनः च अन्ताराष्ट्रिय-स्तरे गन्तुं ध्यानं दातुम् च प्रार्थितवान् । सामाजिक-सञ्जाल-माध्यमेन-लिखितानां लेखानां श्रृङ्खलायां प्रमुख-राष्ट्रिय-दैनिकपत्रिकाभिः सह स्वस्य साक्षात्कारं व्यञ्जयन् मन्त्रिवर्यः एतत् उक्तवान्। श्रीगोयलः इत्यपि अकथयत् यत् कथं व्यापार-व्यवहारः देशाय विभिन्नरूपेण लाभप्रदः भविष्यति । सः अवदत् यत् भारत-यूरोपीयसङ्घ-सन्धिः एका प्रबला **एफ़्. टि. ए.** इति अस्ति या देशस्य संवेदनशील-क्षेत्राणां रक्षणं कुर्वती भारतस्य कृते प्रमुखान् अवसरान् उद्घाटयिष्यति ।

## मृदा-स्वास्थ्य-पत्राणि (HL 4)

देशे पञ्चविंशति-कोट्यधिकानि मृदा-स्वास्थ्य-पत्राणि कृषकेभ्यः प्रदत्तानि । मृत्तिकायां पोषकतत्वानां क्षय-निवारणार्थं पञ्च-दशोत्तर-द्विसहस्रतमाब्दे सर्वकारेण मृत्तिका-स्वास्थ्य-पत्र-योजना आरब्धा। गतवर्षस्य जुलाई-मासपर्यन्तम् अस्याः योजनायाः अन्तर्गतं त्रिणवति-सहस्रतः अधिकेभ्यः कृषकेभ्यः प्रशिक्षणकार्यक्रमाः, षट्-लक्षात् अधिकाः क्षेत्रप्रदर्शन्यः, सहस्रशः जागरण-अभियानाः च आयोजिताः आसन् । सर्वकारः अवदत् यत् अनेन सन्तुलित-पोषण-प्रबन्धनस्य प्रोत्साहन-क्षेत्रे योजनायाः परिमाणं व्याप्तिः च प्रतिबिम्बयते । मृत्तिका-स्वास्थ्य-पत्रम् प्रतिवर्षं द्विवर्षेषु प्रदीयते तथा च कृषकाणां कृते तेषां मृत्तिकायाः पोषक-स्थिति-विषयकं, भौतिक-रसायनिक-स्थिति-विषयकं च विस्तृतं ज्ञानं प्रयच्छति।

## <u>सूरजकुण्डशिल्पमहोत्सवः</u> (HL 5)

उनचत्वारिंशत्तमः सूरजकुण्ड-अन्तर्राष्ट्रीय-शिल्पमहोत्सवः अद्य सूरजकुण्ड-क्षेत्रे आरब्धः। "**<u>स्थानीय से वैश्विक-आत्मनिर्भर भारत</u>**" इत्यनेन विषयेन सह उपराष्ट्रपतिः सी. पी. राधाकृष्णनवर्यः अस्य शिल्पमेलकस्य उद्घाटनम् अकरोत्।

ईजिप्ट्-देशः अस्मिन् वर्षे अपि चतुर्थवारं सहभागीदेशः अस्ति। एतदतिरिच्य, उत्तरप्रदेशस्य मेघालयस्य च समृद्ध-सांस्कृतिक-लोककलानां च प्रदर्शनं मेलक-परिसरे कृतम् अस्ति। शिल्प-महोत्सवे राष्ट्रिय-अन्ताराष्ट्रिय-तन्तुवायैः शिल्पकारैः च द्वादश-शततः अधिकानि आपणानि स्थापितानि सन्ति। षोडश-दिवसात्मकस्य शिल्प-महोत्सवस्य समापन-समारोहः अग्रिमे मासे पञ्चदश-दिनाङ्के भविष्यति।

## <u>निर्मला-आयव्ययप्रपत्रम्</u>

वित्तमन्त्री निर्मला-सीतारमणवर्या श्वः लोकसभायां आगामि-सत्रस्य आयव्यय-प्रपत्रं प्रस्तोष्यति। निम्न-सभायां आय-व्यय-प्रपत्रस्य प्रस्तुती-करणानन्तरं आय-व्ययिकस्य प्रतिलिपिः राज्यसभायां श्वः प्रस्तोष्यते। नवदशोत्तर-द्विसहस्र-तमाब्दे

पदभार-ग्रहणात् आरभ्य श्रीमत्या सीतारमण-वर्यया एतत् निरन्तरं नवमं आयव्ययिकं प्रस्तूयते ।

**भारत-संयुक्त-राष्ट्रम्**

महिला-बाल-विकास-राज्यमन्त्री सावित्रीठाकुरः न्यूयार्क-नगरे संयुक्तराष्ट्र-सङ्घ-मुख्यालये संयुक्तराष्ट्र-सङ्घस्य सामाजिकविकास-आयोगस्य चतुष्षष्टि-तमे सत्रे भारतीय-प्रतिनिधि-सङ्घस्य नेतृत्वं करिष्यति । अग्रिम-मासस्य द्वि-दिनाङ्कात् आरभ्यमानं सत्रं सामाजिक-समावेशनम्, समता, कल्याणोन्मुख-नीतयः चेत्यादिषु सामाजिक-विकास-विषयेषु अन्ताराष्ट्रिय-सहयोगं प्रवर्धयितुं केन्द्रितम् अस्ति ।

**डीजीएचएस-नीट**

स्वास्थ्यसेवा-महानिदेशालयः अद्य सूचितवान् यत् एन. ई. ई. टी., पी. जी. इत्यस्य तृतीया परामर्श-प्रक्रिया पुनः आरब्धा । सामाजिक-सञ्जाल-माध्यमेन स्वास्थ्यसेवा-महानिदेशालयः अवदत् यत् नूतनानां पञ्जीकरणानां सौविध्येन सह परामर्शप्रक्रिया पुनः आरब्धा । सः अवदत् यत् अतिरिक्तानि आसनानि अपि समाविष्टानि सन्ति, येन योग्यानां अभ्यर्थिनां कृते अधिकाः अवसराः उपलप्स्यन्ते। अभ्यर्थिनः परामर्श-प्रक्रियायां भागं गृहीत्वा तदनुसारं स्वेच्छाम् आचरन्तु इति निदेशालयः अकथयत्। अधिक-विवरणानि चिकित्सा-परामर्श-समित्याः सञ्जालपुटे उपलभ्यन्ते ।

**प्रधानमन्त्री-अरबविदेशमन्त्री**

प्रधानमन्त्री नरेन्द्रमोदी अद्य अरबदेशानां विदेशमन्त्रिणां, अरबलीग इत्यस्य महासचिवस्य अरब-प्रतिनिधि-मण्डल-प्रमुखानां च एकेन प्रतिनिधिमंडलेन सह मेलनम् अकरोत्, यत् भारत-अरब-विदेश-मन्त्रिणाम् उपवेशनाय नवदिल्ल्याम् अस्ति । उपवेशनावधौ , प्रधानमंत्रिणा भारत-अरबराष्ट्रयोः मध्ये सुदृढैतिहैसिक-सम्बन्धेषु बलम् प्रदत्तम्। प्रधानमंत्रिणा मोदिना फिलिस्तीनस्य नागरिकेभ्यः भारतस्य निरन्तर-समर्थनं पुनरुच्चारितम् सहैव गाजा-शांति-योजना-सहितं प्रवर्तमानाः शान्तिप्रयासाः अपि भारतेन समर्थिताः । सः क्षेत्रीय-शांत्यै स्थिरतायै च प्रयासानां समर्थनं कर्तुं अरब-समूहेन निभालितायाः महत्वपूर्ण-भूमिकायाः प्रंशसाम् अकरोत् ।

**क्रिकेट्- (HL 5)**

पुरुषाणां क्रिकेट-क्रीडायाम् अद्य सायङ्काले तिरुवनंतपुरं-नगरस्य ग्रीन्फील्ड-अन्ताराष्ट्रिय-क्रीडाङ्गणे पञ्चम्याम् अन्तिमायां च टी-विंशति-अन्ताराष्ट्रिय-

क्रीडायां भारतीय-क्रिकेट-दलं न्यूज़ीलैण्ड-दलेन सह क्रीडिष्यति। क्रीडा एषा सायं सप्तवादने आरप्स्यते।

**॥ इति वार्ताः ॥**